## सञ्ज्ञायां च । (७७/३८११)

सञ्ज्ञायां[1] विषये अणन्ते उत्तरपदे अकृञः पूर्वपदमाद्युदात्तं भवति । तन्तुवायो नाम [2]कीटः । वालवायो नाम पर्वतः । अकृञः इत्येव, रथकारो नाम [3]ब्राह्मणः ॥

## गोतन्तियवं पाले । (७८/३८१२)

गो तन्ति यव इत्येतानि [4]पूर्वपदानि पालशब्दे उत्तरपदे आद्युदात्तानि भवन्ति । गोपालः । तन्तिपालः[5] । यवपालः । अनियुक्तार्थ आरम्भः । गोतन्तियवम् इति किम् ? वत्सपालः । पाले इति किम् ? गोरक्षः ॥

## णिनि । (७९/३८१३)

[6]णिनन्ते उत्तरपदे पूर्वपदमाद्युदात्तं भवति । [7]पुष्पहारी । फलहारी । पर्णहारी ॥

## उपमानं शब्दार्थप्रकृतावेव । (८०/३८१४)

उपमानवाचि पूर्वपदं शब्दार्थप्रकृतौ एव [8]णिनन्ते उत्तरपदे आद्युदात्तं भवति[9] । उपमानं नियम्यते । [10]उष्ट्रक्रोशी । ध्वाङ्क्षरावी । [11]खरनादी । उपमानग्रहणमस्य[12] पूर्वस्य च योगस्य विषयविभागार्थम् । शब्दार्थप्रकृतौ इति किम् ?[13] वृकवञ्ची । वृकप्रेक्षी । प्रकृतिग्रहणं किम् ? प्रकृतिरेव यत्रोपसर्गनिरपेक्षा शब्दार्था भवति तत्रैव यथा स्याद्, इह मा भूद् गर्दभोच्चारी, कोकिलाभिव्याहारी इति । एवकारकरणमुपमानावधारणार्थम् । शब्दार्थप्रकृतौ त्वनुपमानमुपमानं च आद्युदात्तं भवति । सिंहविनर्दी । पुष्कलजल्पी ॥

## युक्तारोह्यादयश्च । (८१/३८१५)

युक्तारोह्यादयः[14] समासाः आद्युदात्ता भवन्ति । युक्तारोही । [15]आगतरोही । आगतयोधी । आगतवञ्ची । आगतनर्दी । आगतप्रहारी । एते णिनन्ताः 'णिनि' (६.२.७९/३८१३) इत्यस्यैवोदाहरणार्थं पठ्यन्ते । पूर्वोत्तरपदनियमार्था इति केचित् । इह मा भूत्, वृक्षारोही, युक्ताध्यायी इति । आगतमत्स्या । क्षीरहोता । भगिनीभर्ता । याजकादित्वात् षष्ठीसमासावेतौ । ग्रामगोधुक् । अश्वत्रिरात्रः । गर्गत्रिरात्रः । व्युष्टत्रिरात्रः । शणपादः । समपादः । षष्ठीसमासा एते । एकशितिपात् । एकः शितिः पादोऽस्य इति त्रिपदो बहुव्रीहिः । तत्र एकशितिशब्दस्तद्धितार्थोत्तरपदः इति तत्पुरुषसञ्ज्ञः, तस्य निमित्तिस्वरबलीयस्त्वाद् अन्तो–

---

1. च इत्यधिकम् क. 2. कीटकः ह. 3. जातिः ह. 4. पूर्वपदानि नास्ति फ. 5. तन्तिः बन्धनरज्जुः इत्यधिकम् फ. 6. ण्यन्ते फ. 7. पुष्पहारी नास्ति क. फ. ग. 8. णिनि क, णिन्नन्ते ह. 9. पूर्वेण सिद्धे नित्यार्थवचनम् इत्यधिकम् ह. 10. उष्ट्र इव क्रोशति इति इनिः इत्यधिकम् ड. 11. खरनादी नास्ति ग. 12. च इत्यधिकम् क, पूर्वस्य च योगस्य नास्ति फ. 13. वृकवञ्ची – किम् नास्ति ह. 14. शब्दाः ह. 15. उदाहरणमिदं नास्ति फ.